# भारतराष्ट्रपरिचयः

डॉ. सुरेन्द्र शर्मा

स्वायम्भुवस्य मनोर्ज्येष्ठपुत्रस्य प्रियव्रतस्य दशपुत्रा आसन्। तेषु सप्तैव उत्तराधिकारिरूपेण सप्तद्वीपानां नृपतयो बभूवुः। त्रयः पुत्रा योगपरायणा उत्तराधिकारं नैव गृहीतवन्तः। द्वीपाधिकारिणां सप्त पुत्राणां नामान्यधिकृतद्वीपानुसारं निम्नप्रकारेण उल्लेखनीयानि सन्ति–

(1) आग्नीध्रः– जम्बूद्वीपनृपः (2) मेधातिथिः– प्लक्षद्वीपनृपः (3) ावपुष्मान्शाल्मलीद्वीपनृपः (4) ज्योतिष्मान्– कुशद्वीपनृपः (5) द्युतिमान्– क्रोञ्चद्वीपनृपः (6) भव्यः– शाकद्वीपनृपः (7) सवनः– पुष्करद्वीपनृपश्च।

शेषाणाां त्रयाणां पुत्राणां नामानि मेधा अग्निबाहुः पुत्रश्चासन्।

**जन्बूद्वीपस्य विभाजनम्–**

आग्नीध्रस्य नव पुत्रा आसन्। तेषां नामानि सन्ति– (1) नाभिः (2) किम्पुःषः (3) हरिवर्षः (4) इलावृतः (5) रम्यः (6) हिरण्वान् (7) कुरुः (8) भ्रदाश्वः (9) केतुमालश्च।

आघ्नीध्रः जम्बूद्वीपस्य नवधा विभाजनं कृत्वा प्रत्येकमेकैकस्याधिकारिणं कृतवान्। विभाजितानां नवखण्डानां नामान्यधिकारिक्रमेण निम्नानुसारं निर्दिष्टानि सन्ति–

(1) नाभिः – हिमवर्षः (2) किम्पुरुषः– हेमकूटः (3) हरिवर्षः– नैषधवर्षः (4) इलावृतः– इलावृवर्षः (5) रम्यः– नीलाचलवर्षः (6) हिरण्वान्– श्वेतवर्ष (7) कुरुः– उत्तरकुरुवर्षः (8) भद्राश्वः– भद्राश्ववर्षः (9) केतुमालः – गन्धमादनवर्षः

**नाभिवंशः**

नाभेरेक एव पुत्र आसीत्। तस्य नाम ऋषभ इत्यासीत्। ऋषभस्य शतं पुत्रा आसन्। तेषु भरतः ज्येष्ठ आसीत्। नाभे हिमवर्षम् ऋषभ प्राप्तवान्। षनात् हिमवर्षः भरतेन सम्प्राप्तः। अस्य ऋषभपुत्रस्य भरतस्य नाम्नैव हिमवर्षः भरतेन सम्पप्राप्तः। अस्य ऋषभपुत्रस्य भरतस्य नाम्नैव हिमवर्षः कालान्तरे भारतवर्ष इति नाम्ना प्रसिद्धौ बभूव इति पुराणैर्विज्ञायते।

अस्यापि भारतवर्षस्य पुनर्नवधा विभाजनं सञ्जातम्। अतएव भारतभूभागे नवद्वीपानां स्थितेरुल्लेखाः उपलभ्यन्ते– (1) इन्द्रद्वीपः (2) कसेरुद्वीपः (3) ताम्रपर्णद्वीपः (4) गभस्तिमान् द्वीपः (5) नागद्वीपः (6) सौम्यद्वीपः (7) गन्धर्वद्वीपः (8) वारुणद्वीपः (9) कुमारीद्वीपश्च। वर्तमाने कुमारीद्वीपपर्यन्तिको भाग एव भारतवर्ष इति नाम्ना विज्ञायते। सुदीर्घकालात् इदमेव नाम अस्य कृते सुप्रचलितमस्ति।

भरतस्य नाम्ना अयं देशो भारत इत्युच्यते स्म इति सन्दर्भे 'भरत' शब्दस्यार्थो विचारणीयोऽस्ति।

अस्मिन् विषये वैदिकनिघण्टुकारो भगवान् यास्कः यज्ञसम्पादकानां ऋत्विजाम् अष्टौ नामान्युल्लिखति प्रथमं नाम 'भरताः' इत्यस्य स्थाने क्वचिद् 'भारताः' क्वचि सहेव उल्लेखोऽपि प्राप्यते। भरतः क इति सन्दर्भे शतपथ ब्राह्मणे वचनमस्ति–

(1) "प्रजापतिर्वै भरतः स हीदं सर्वं बिभर्त्ति" (शत.ब्रा. 5/8/1/14)

(2) "प्रजापतिर्वै मनुः स इदं सर्वम् अमनुत।" (शत.ब्रा. 9/6/1/19)

शतपथमतेन मनुरेव भरतसंज्ञक आसीत्। प्रजापतित्वात् प्रजाया भरणपोषणकर्तृत्वात् तदीयं भरतत्वं विज्ञापितं भवति।

कौषीतकिब्राह्मणे तूक्तम्–

"**अग्निर्वै भरतः स वै देवेभ्यो इव्यं भरति**" (कौषी.ब्रा. 3/2)

शतपथब्राह्मणस्यैवाधोलिखितेन वचनेनास्य पुष्टिर्भवति–

"**अषहि देवेभ्यो हव्यं भरतितस्माद् भरतोऽग्निरित्याहुः।**" (शत.ब्रा. 1/4/2/2)

अग्निर्हि देवानां यज्ञहव्येन भरणपोषणं करोति अतएवाग्नेरपि भरतसंज्ञा। भरतस्योक्त वैशिष्ट्यं मनसि कृत्वैव भगवान् ऋषभः स्वपुत्रस्य नाम भरत इति चक्रे। यद्यपि यज्ञोपासकत्वात् ततःपूर्वमपि अस्मद्देशीयाः प्रजा भारती इत्युच्यते स्म।

महाकविः कालिदासवोऽपि दुष्यन्तपुत्रस्य भरतस्य नामकरणसन्दर्भे अमुं रहस्यं गूढं प्रवक्ति–

**इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः।**

**पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्।।** (अभि.शाकु. 7/33)

अयमपि भरतो मनुतुल्यतां प्राप्तवान् किन्तु भारत इति नामकरणे ऋषभपुत्रो भरत एव हेतु र्न तु दुष्यन्तपुत्रो भरतः। तथापि दुष्यन्तपुत्रस्य भरतस्य महत्त्वम् अस्यां परम्परायां वैदिकयज्ञियसंस्कृतेः परिपोषकत्वात् स्वीक्रियते। एतरेय ब्राह्मणस्योल्लेखानुसारम् अयं भरतः त्रयस्त्रिंशदुत्तरशतमितानि यज्ञानि अश्वमेघसंज्ञकानि सम्पादितवान्। अस्य चक्रवर्त्तित्वचे यज्ञियदेशानां पर्याप्तं विस्तारः समभवत्।

यज्ञियसंस्कृतेः प्रसाराद् भारते म्लेच्छत्वस्य सर्वथाऽपहारः संजातः। अतएव मानवीय आचारव्यवहारयोर्विशुद्धतायाः संस्थापनाद् भारतस्य महत्त्वं विश्वस्मिन् विश्वे अवर्धत। भगवतो मनोः काले एव म्लेच्छस्वापहारस्य प्रक्रिया प्रारभत। अतएव मनुस्मृतौ ब्रह्मावर्त्तः, ब्रह्मर्षिदेशः, आर्यावर्तः, यज्ञियदेशश्चास्य संज्ञा उपलभ्यन्ते। अस्मादिरिक्तावशिष्टभूभागस्य कृते म्लेच्छसंज्ञा व्यवहारः प्राप्यते।

भाषिक व्यवहारेऽपशब्दानां प्रयोगात्तेषां मलेच्छत्वम्। भारते तु भगवता पाणिनिना बहुपूर्वं देववाण्या माध्यमेन भाषायां विशुद्धव्यवहाराय शब्दोपदेशः कृत आसीत्। अस्य शब्दानुशासनस्य परम्परया म्लेच्छत्वमत्र तत एव निराकृतमासीत्। भारतस्य विश्वगुरुत्वेऽपि इदमेव प्रमुखकारणमासीद् यत् अत्रत्य संस्कृतभाषायामपशब्दविवेको नास्ति शब्दानामेवानुशासनमत्रोद्दिष्टम्।

*पूर्व प्राचार्य, श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर*